# shrInRisiMhagiri aShTottarashatanAmastotram

# શ્રીનૃસિંહગિરિમહામણ્ડલેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : nRisimhagiriaShTottarashatanAmastotra

File name : nRisimhagiriaShTottara.itx

Category : aShTottarashatanAma, deities_misc

Location : doc_deities_misc

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com

Latest update : January 4, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીનૃસિંહગિરિમહામણ્ડલેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્

બ્રહ્મવર્ણ સમુદ્ભૂતો બ્રહ્મમાર્ગપ્રવર્દ્ધકઃ ।
બ્રહ્મજ્ઞાનસદાસક્તો બ્રહ્મજ્ઞાનપરાયણઃ ॥ ૧॥

શિવપઞ્ચાક્ષરરતોઽશિવજ્ઞાનવિનાશકઃ ॥

શિવાભિષેકનિરતઃ શિવપૂજાપરાયણઃ ॥ ૨॥

નારાયણપ્રવચનો નારાયણપરાયણઃ ।
નારાયણપ્રત્નતનુર્નારાયણનયસ્થિતઃ ॥ ૩॥

દક્ષિણામૂર્તિપીઠસ્થો દક્ષિણામૂર્તિદૈવતઃ ।
શ્રીમેધાદક્ષિણામૂર્તિમન્ત્રયન્ત્રસદારતઃ ॥ ૪॥

મણ્ડલેશવરપ્રેષ્ઠો મણ્ડલેશવરપ્રદઃ ।
મણ્ડલેશગુરુશ્રેષ્ઠો મણ્ડલેશવરસ્તુતઃ ॥ ૫॥

નિરઞ્જનપ્રપીઠસ્થો નિરઞ્જનવિચારકઃ ।
નિરઞ્જનસદાચારો નિરઞ્જનતનુસ્થિતઃ ॥ ૬॥

વેદવિદ્વેદહૃદયો વેદપાઠપ્રવર્તકઃ।
વેદરાદ્ધાન્તસંવિષ્ટોઽવેદપથપ્રખણ્ડકઃ ॥ ૭॥

શાઙ્કરાદ્વૈતવ્યાખ્યાતા શાઙ્કરાદ્વૈતસંસ્થિતઃ ।
શાકરાદ્વૈતવિદ્વેષ્ટૃવિનાશનપરાયણઃ ॥ ૮॥

અત્યાશ્રમાચારરતો ભૂતિધારણતત્પરઃ ।
સિદ્ધાસનસમાસીનો કાઞ્ચનાભો મનોહરઃ ॥ ૯॥

અક્ષમાલાધૃતગ્રીવઃ કાષાયપરિવેષ્ટિતઃ ।
જ્ઞાનમુદ્રાદક્ષહસ્તો વામહસ્તકમણ્ડલુઃ ॥ ૧૦॥

સન્ન્યાસાશ્રમનિર્ભાતા પરહંસધુરન્ધરઃ ।
સન્ન્યાસિનયસંસ્કર્તા પરહંસપ્રમાણકઃ ॥ ૧૧॥

માધુર્યપૂર્ણચરિતો મધુરાકારવિગ્રહઃ ।
મધુવાઙ્નિગ્રહરતો મધુવિદ્યાપ્રદાયકઃ ॥ ૧૨॥

મધુરાલાપચતુરો નિગ્રહાનુગ્રહક્ષમઃ ।
આર્દ્ધરાત્રધ્યાનરતસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ॥ ૧૩॥

આરણ્યવાર્તિકપરઃ પુષ્પમાલાવિભૂષિતઃ ।
વેદાન્તવાર્તાનિરતઃ પ્રસ્થાનત્રયભૂષણઃ ॥ ૧૪॥

સાનન્દજ્ઞાનભાષ્યાદિગ્રન્થગ્રન્થિપ્રભેદકઃ ।
દૃષ્ટાન્તાનૂક્તિકુશલો દૃષ્ટાન્તાર્થનિરૂપકઃ ॥ ૧૫॥

વીકાનેરગુરુર્વાગ્મી વઙ્ગદેશપ્રપૂજિતઃ ।
લાહૌરસરગોદાદૌ હિન્દૂધર્મપ્રચારકઃ ॥ ૧૬॥

ગણેશજયયાત્રાદિપ્રતિષ્ઠાપનતત્પરઃ ।
ગણેશશક્તિસૂર્યેશવિષ્ણુભક્તિપ્રચારકઃ ॥ ૧૭॥

સર્વવર્ણસમામ્નાતલિઙ્ગપૂજાપ્રવર્દ્ધકઃ ।
ગીતોત્સવસપર્યાદિચિત્રયજ્ઞપ્રવર્તકઃ ॥ ૧૮॥

લોકેશ્વરાનન્દપ્રિયો દયાનન્દપ્રસેવિતઃ ।
આત્માનન્દગિરિજ્ઞાનસતીર્થ્યપરિવેષ્ટિતઃ ॥ ૧૯॥

અનન્તશ્રદ્ધાપરમપ્રકાશાનન્દપૂજિતઃ ।
જૂનાપીઠસ્થરામેશવરાનન્દગિરેર્ગુરુઃ ॥ ૨૦॥

માધવાનન્દસંવેષ્ટા કાશિકાનન્દદેશિકઃ ।
વેદાન્તમૂર્તિરાચાર્યો શાન્તો દાન્તઃ પ્રભુસ્સુહૃત્ ॥ ૨૧॥

નિર્મમો વિશ્વતરણિઃ સ્મિતાસ્યો નિર્મલો મહાન્ ।
તત્ત્વમસ્યાદિવાક્યોત્થદિવ્યજ્ઞાનપ્રદાયકઃ ॥ ૨૨॥

ગિરીશાનન્દસમ્પ્રાપ્તપરમહંસપરમ્પરા
જનાર્દનગિરિબ્રહ્મસંન્યાસાશ્રમદીક્ષિતઃ ॥ ૨૩॥

મણ્ડલેશકુલશ્રેષ્ઠજયેન્દ્રપુરીસંસ્તુતઃ ।
રામાનન્દગિરિસ્થાનસ્થાપિતો મણ્ડલેશ્વરઃ ॥ ૨૪॥

શન્દમહેશાનન્દાય સ્વકીયપદદાયકઃ ।

યતીન્દ્રકૃષ્ણાનન્દૈશ્ચ પૂજિતપાદપદ્મક્ઃ ॥ ૨૫॥

ઉષોત્થાનસ્નાનપૂજાજપધ્યાનપ્રચોદકઃ ।
તુરીયાશ્રમસંવિષ્ઠભાષ્યપાઠપ્રવર્તકઃ ॥ ૨૬॥

અષ્ટલક્ષ્યીપ્રદસ્તૃપ્તઃ સ્પર્શદીક્ષાવિધાયકઃ ।
અહૈતુકકૃપાસિન્ધુરનઘોભક્તવત્સલઃ ॥ ૨૭॥

વિકારશૂન્યો દુર્ધર્ષઃ શિવસક્તો વરપ્રદઃ ।
કાશીવાસપ્રિયો મુક્તો ભક્તમુક્તિવિધાયકઃ ॥ ૨૮॥

શ્રીભત્પરમહંસાદિસમસ્તબિરુદાઙ્કિતઃ ।
નૃસિંહબ્રહ્મ વેદાન્તજગત્યઘ જગદ્ગુરુઃ ॥ ૨૯॥

વિલયં યાન્તિ પાપાનિ ગુરુનામાનુકીર્તનાત્ ।
મુચ્યતે નાત્ર સન્દેહઃ શ્રદ્ધાભક્તિસમન્વિતઃ ॥ ૩૦॥

ઇતિ શ્રીનૃસિંહગિરિમહામણ્ડલેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

Proforead by Nat Natarajan nat.natarajan at gmail.com

---

*shrInRisiMhagiri aShTottarashatanAmastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*